# सोमनाथशतकम्

Exported from ambuda.org on 2025-12-23 05:03:15 UTC

1

आर्यासूनुसमानं प्रणम्यमानं धरासुरैः प्रवरैः ।झापाम्बया तयालं मुद्गलमालम्बदं कलये ॥ १ ॥

2

वृत्ताभिख्याहृतायाँ श्रुतविविधगणां छन्दसां वर्णनीयांयातां सर्वादिमत्वं सुरगणकलितां भासमत्वं दधानाम् ।युक्तं स्थानं नयन्तीं लघुमपि सकलं बिभ्रतीं मालयायां (मात्रयालं)वन्दे वार्धीभवर्णां भृतमुनियतिकां स्रग्धरां शम्भुमूर्तिम् ॥ २ ॥

3

शान्तेर्मातुर्विवेकात्पितुरपि कृपणं मङ्क्षु कृत्वा पृथङ्माम्आशायोषा स्वतन्त्रा व्रजति परगृहान् सर्वदा वीतलज्जा ।संधत्ते मत्कृशत्वं मम यमनियमौ भ्रातरौ भर्त्सयन्तीपुष्ट्वा दम्भं स्वबन्धुं तदपि कथमहं हन्त वन्ध्यां श्रयामि ॥ ३ ॥

4

आशा सैषाऽवलोकच प्रचुरपरवसु प्रैषयन्मां तदर्थेनानादेशानटित्वार्जयमथ तदहं लोभपुत्रानुयातः ।दम्भं संगम्य मित्रं तदनु मदमहास्तेननिःस्वीकृतत्वात्खिन्नोऽप्येनां कुनाथः कथमहह पुनः प्रेरयन्तीं भजेयम् ॥ ४ ॥

5

द्वारेद्वारे परेषां तमसि विलसिते रत्यवाप्त्यै भ्रमन्त्यास्वस्त्रीसक्त्याऽन्यदीयां रतिमविदधतम्तान्मृषा विद्विषन्त्या |मुञ्चन्त्या लोकलजामहह कुलटयेवाशया दूषितो नाश्प्रायश्चित्तं गृहीतुं किमपि न यतते संगयोग्यो हि नो ना ॥ ५ ॥

6

आविर्भूतप्रदोषां प्रविततततमसा निर्मितां भूरिजन्तु-प्रागल्भ्यं दारयन्तीं द्युतिनिधनकरीं भानिधेरप्यतीव |आलम्ब्याशानिशां यो विचरति परितः किं न स स्यात्पिशाच-श्चित्रं त्वेतच्चितायां न वसति लभते नाप्यदृश्यत्वमेषः ॥ ६ ॥

7

आशा निष्ठा प्रतिष्ठा किल मम महिलास्तासु सौख्यं कदाचित्या प्रान्त्या सा प्रदद्यादिह किमपि तथा मध्यमा सा परत्र ।आद्या सा नोभयत्राप्यहह तदपि किं सक्ततां यामि तस्यांया प्रौढ्यादप्रगल्भे प्रतिदिवसमुभे ते कदर्थीकरोति ॥ ७ ॥

8

त्वं चेन्नीचत्वभीतः किमपि सुखमिह स्थातुकामोऽसि तद्धोविद्वन् ! मुञ्चापराशा मसदृशमुचितां हन्त पत्युर्जडानाम् ।एतामालम्ब्य दीनामनुदिनमिनवत्प्राग वात्यो(प्तो)दयत्वेऽ-प्यत्युच्चत्वेऽपि के के न हि बहुविपदं दीप्तिमन्तोऽपि यान्ति ॥ ८ ॥

9

विद्याभ्यासाख्यमाद्ये वयसि गुरुगृहे भूरि दुःखं मयाप्तंवित्तप्राप्त्याशया च प्रचुरधरणिभृत्सेवनाह्वं द्वितीये ।तार्तीयीके सकामव्रतयजनजपध्यानरूपं परं तुप्रापि कापीप्सितं नो तदपि न चरमे मुच्यते हा दुराशा ॥ ९ ॥

10

मातस्तात प्रभो भो नयनविषयिते पादुके यन्मया तेतत्पुण्यं पूर्वजानामिति रचितवचाः शौचमाचारमुज्झन् ।जात्युच्चो नीचभूपानुपचरति तथाप्यौदरीं नैति पूर्तिसत्येवं हन्त जन्तुर्भजति न तु कथं विश्वदं विश्वनाथम् ॥ १० ॥

11

भीतिव्रीडाविहीनो गहनगिरिदरीरन्यदीयान्गृहान्वासेवेतापास्य धर्मं नयमपि सपदि प्रायशो यद्वशो ना ।आशा सैषा मनोजा रतिपतिभगिनी कामशत्रो! ततस्तांजन्तुक्लेशैकहेतुं तमिव बहुकृते किन्न भस्मीकरोषि ॥ ११ ॥

12

श्रेयस्वी यत्र मानं व्रजति दुरितकृत् चापमानं मनुष्यै-रज्ञेयं तत्र दूतैः प्रभुमनु मनुजो नीयते चानपेक्षः ।मृत्योर्गेहं वरं तन्न तु कुधनवतो यत्र सर्वापमानोलोकैर्विज्ञायमानः स्वयमतिथितया यत्र चार्थी प्रयाति ॥ १२ ॥

13

द्वारेद्वारे परेषामविरतमटति द्वारपालैः करालैःदृष्ट्वा यष्ट्याहतम्सन् रणति गणयति स्वापमानं तु नैव ।क्षन्तुं शक्नोति नान्यं स्वसदृशमितरागारमप्याश्रयन्तंश्राम्यत्यात्मोदरार्थे कथमहह शुना नो समो याचकस्सः ॥ १३ ॥

14

पङ्गोर्भावं वरं न त्वणुतरमनसां याचनायाङ्घ्रियानंमूकत्वं वा वरं न त्वपलपितगुणं देहिदेहीति वाणी ।जन्मान्धत्वं वरं न त्वधमधनवतामास्यभङ्गस्य वीक्षाबाधिर्ये वा वरं न त्वतिपरुषगिरः संश्रुतिः प्रार्थितानाम् ॥ १४ ॥

15

स्वैर्लोकैर्योऽनुगम्य: प्रथममसदपि प्राप्नुयाद्यो गुणित्वंपश्चाद्विन्द्याद्गुरुत्वं ध्रुवमुदयति यः प्राणहीनो वरं सः ।न त्वर्थी योऽतिहेयो द्रुतमुचितजनैर्यश्च सिद्धं गुणित्वंमुञ्चेद्योचे(दञ्चे?)लघुत्वं महदहह न वा याति जातूदयं यः ॥ १५ ॥

16

धन्यं वन्यं हि मन्ये तृणमतनुगुणग्राहिकः कोऽपि लोकोमूर्धन्याधाय धाम स्वमभिनयति यत्सर्वदानन्ददायि ।धिग्व्यर्थं त्वर्थिनं तं पृथुगुणमपि यं वीक्षतेऽपि क्षणं नोदूरोद्विग्नो जनो न प्रणमति न नयत्यात्मगेहं च तत्किम् ॥ १६ ॥

17

चौर्य कार्यं तदा यैर्निजमुदरदरीपूरणं नो भवेच्चेद्उच्चैर्नीचत्वहेतुं न तु विदधतु ते याचनं यातनार्थम् ।यस्माच्चोरा: सुराजानुमतविधिवशाच्छूलपीठोपवेशाद्उच्चत्वं तत्प्रयान्ति स्फुरति करतलोत्तानता नैव तत्र ॥ १७ ॥

18

यं कंचित्सञ्चितस्वं कुवचनरचनं नैव याचस्व किंचित्त्वामित्थं चित्त ! याचे तव रुचिरथ चेद्याचने याच्य ईशः ।भिक्षार्थित्वेन जानन्व्यसनमिव पृथु प्रार्थितव्यर्थतोत्थंसामर्थ्याद्विश्वनाथः कथमपि वृथयत्यर्थनामर्थिनां न ॥ १८ ॥

19

याचन्तां केचिदाढ्यं पुरपतिमितरे देशनाथं तथान्येदिग्रक्षं केचनैके क्षितिपतिमपरे स्वर्पतिं स्वल्पचि(वि?)त्तम् ।याचेऽहं तु त्रिलोकीपदसदधिकृतब्रह्मवाणीत्रिवेणी-प्रावीण्यावर्णनीयागणितगुणगणं श्रीमहादेवमेव ॥ १९ ॥

20

लक्ष्मीरेषा विषादप्यतिशयविषमा सेवमानोऽनिश यांतं मोहं याति जन्तुः कथमपि विरतिर्मन्त्रतन्त्रैर्न यस्य ।व्यामोहं तत्तु सात्म्येन जनयति भवन्सो ऽपि तैस्ति जय्यःसर्वज्ञोऽधत्त निःखोऽप्यत इव बंत तत्तांविहायाब्धितीरे ॥ २० ॥

21

सुज्ञाऽकस्माद्भवन्त्या दृशमथ रजसा पश्यतां दूषयन्त्यायत्किंचित्कम्पयन्त्या निकटगत(म)मृदुं शब्दमाश्रावयन्त्या । उन्मार्गेणोच्चलन्त्या सपदि कमलया वात्ययेवाभिभूताःके के भ्रान्त्या पतेयुर्न जगति तृणवत्तूर्णमुड्डीय पूर्वम् ॥ २१ ॥

22

लक्ष्मीश्चेल्लोकमाता किमवति न जनं प्रत्युतायासहेतुःलोको मातेव यस्या इति भवतु पुनर्योगतः सा कथञ्चित् ।यत्प्राप्यापत्यवत् तां वहति निजतनौ स व्ययात्पाति भीतःपुष्णाति प्रत्यहं च त्यजति न मनसाप्यन्तकालेऽतिरागात् ॥ २२ ॥

23

नृभ्योऽग्नौ स्वस्य धातुद्रवणमथ जले मज्जनं छेदनं तः (तैः ?)शस्त्रैः संदंशयोगोऽनलमिलनमयस्ताडनं जन्मनीति । दीनाराद्यर्थसार्थो व्यथनकृदखिलं संस्मरन् किं समर्थ-स्तज्जातीयांस्तथैव व्यथयति धनिनो बन्धभूक्षेपखिन्नः ॥ २३ ॥

24

आः किं भुङ्क्षे त्वमाशीविषविषवदिमां मारयन्तीं जनानांकार्ता(?)पस्वादुतैव (ऽस्मारतैव?) स्फुरति भवति वा यद्वशात्कण्ठरोधः ।किंतु श्रेयोऽधिगन्तुं भज भवभिषजं तं विषादं विषादंत्यक्त्वा त्वां तत्र सक्तं कृपणमपि कृपा यस्य पायादपायात् ॥ २४ ॥

25

कारागारं बत स्त्री विसहगिति पतिः सापराधं यदन्यंबघ्नात्यस्मिन्करार्थी न किमपि यतते रक्षणे चास्य बद्धः ।अस्यां तूदेति बन्धः क्षरदवधि करग्राहिणः पत्युरेवप्रायोऽस्याः पालनादौ वहति च नितरां तादृशोऽप्येष चिन्ताम् ॥ २५ ॥

26

सेयं हेया सुधीभिः कथमपि तरुणी वारुणीतोऽपि भीमायामालोक्यैव दूरात्सपदि बत नरो माद्यति भ्रान्तिमेति ।लज्जां मुञ्चत्यवश्यं रचयति वचनं किंचिदुच्चावचं चप्रायो हाला तु कालाद्गतिमिति कुरुते सेविता सत्यतीव ॥ २६ ॥

27

बाला ज्वाला विचित्रा सखिवरशिखिनः स्नेहतो नैव योज्यादाहं या हन्त दृष्टा वितरति नितरां भूतिनाशं तनोति ।पोषं दोषं जडत्वं नयति च दहति प्रायशोऽत्यन्तदग्धंकम्पं संपन्नभावं गमयति तमसोऽतीव वृद्धिं करोति ॥ २७ ॥

28

नाशे हेतुर्वसूनामहह वसुमतः स्वप्रवेशस्य कालेस्वाधीनत्वात्कलानां निधिमपि गमयत्येव दोषाकरत्वम् ।उच्चैर्माराङ्गभूता प्रतिभयतमसो भूर्निसर्गेण योषायाति प्राप्नोति तस्योद्वहनकृत उषा रात्रिरित्थं स्फुटार्था ॥ २८ ॥

29

हन्त स्त्री मारशस्त्री सुखहृदपि कथं हृद्यभावेन कान्ताकिं तु प्रायः सुखात्तं कुरुत इति बुधैः कर्तृवत्सा निरुक्ता ।शत्रौ मित्रोक्तिवद्वा कथमपि गदिता वैपरीत्येन यद्वासंज्ञात्वेनात्र वैद्यैरमृतमिव विषे कैश्चिदेवं प्रयुक्ता ॥ २९ ॥

30

कान्ताकान्तारभूमिं परिहर सर रे चित्तमातङ्ग दूरंशूरो मध्यो (मृत्यु: ?) मृगारिः सततमदयुतं मर्दयेत्तत्र तु त्वाम् ।सत्येवं च त्वदन्तर्मिलितमपहरेन्मारभिल्लो विवेकंमुक्ता सङ्घ महार्घ्यं सुजनसमुचितं रागगुञ्जैकयोग्यः ॥ ३० ॥

31

दृक्पातेनान्नपानाभिलषणविरतिं कान्तिशान्ति तनुत्वंस्वापान्तं भ्रान्ततां ह्रीहतिमथ वचनोच्चावचत्वं ददत्या ।मायाविन्या स्वभावाद्गलितशुचितया निर्दयत्वं दधत्याश्लिष्टे योषापिशाच्या निजरसवशतः पुंसि सौख्यं कथं स्यात् ॥ ३१ ॥

32

नार्यङ्गानां यदङ्गोपमितिरधिगता ते कुरङ्गादयो यांपुष्यत्यन्यं फलैर्या हरति परमलं या च नद्या खतोत्था (तो या?) ।तामुन्मुच्याटवीं किं श्रयसि मृगदृशं पोषणीयां प्रयत्नैःक्लिन्नामन्तर्बहिश्च प्रबलमलशतैर्वञ्चितः काव्यगोष्ठया ॥ ३२ ॥

33

श्वश्रूः साधित्यकैव श्वशुर उहरगः (उटजकः?) श्यालका भूरुहोऽर्हाःश्याल्यो वल्लयो विचित्राः सखि कुलममलं श्वापदानां कदम्बम् ।भार्या दर्यार्ययोग्या सुततितिरपि सत्कर्मणां पङ्क्तिरग्रेमुञ्चन्ती प्रीतये मे फलनिकरमिति प्रार्थित कर्हि सिध्येत् ॥ ३३ ॥

34

भोगा रोगास्त्वपूर्वा गुणविषमतया देहिनं व्याप्नुवन्तोनिघ्नन्तो विप्रयोगे दिनकरभजनादौषधाच्चानिवार्याः ।प्राप्य प्रायो युवानं विहितविकृतयः प्राणिभिः काङ्क्षणीयाःसत्येवं हन्त जानन्नपि भजति कथं स्वापदेरीति (ऽरीनि)वामून् ॥ ३४ ॥

35

दुष्टेऽस्मिन्भोगिभावे श्रवणरहितता विष्णुसेविद्विषत्ताद्वैजिह्वं जिह्मगत्वं परहतिपटुताऽधःस्थलोके निवासः ।भोगच्छेदे विपत्तिः सपदि च तदिदं सर्वमर्ह पर तत्चित्रं वाताशनत्वं न यदिह न हि वा भोगसंकोचिता यत् ॥ ३५ ॥

36

श्रीरामापुत्रधामाद्यधिगत(ति?)विषयां सुज्ञ चिन्तां त्यजैतांप्राचीनं कर्म शर्म प्रवितरति विना प्रार्थनेन व्यथावत् ।चिन्तामात्रेण वित्ताद्यधिगतिरिरिति चेकिं न सर्वे समृद्धाःकिंतु स्यादङ्गसादो धुतिनिघनमपि प्रत्युतास्याप्रसादात् ॥ ३६॥

37

सारं सारङ्गनेत्रा जगति न हि भवेदन्तवैरस्यदात्रीमा वामावास्यकाया रजनिरिव तमोदूषिता नैव सारम् ।नो वीनोऽपीष्टपुत्रादिकविषयचयः सारमस्थैर्यपात्रंसन्नासन्नाय गोप्यं स्वहितमुपदिशन्नेक एवास्ति सारम् ॥ ३७ ॥

38

नेहे गेहेषु सौख्यं धनतनयहयप्रेष्यदासीपशुभ्योभोगान् रोगानमुख्यान्न तु रतचतुरा नो नवाः कान्तकान्ताः ।प्राज्यं राज्यं न भूमेररिपु न बत वा शेवधीन् दीनबन्धोशम्भो दम्भोलिपाणेर्न पदमपि चलं किन्तु देहि स्वदास्यम् ॥ ३८ ॥

39

क्षुद्रैरन्तर्बहिर्यन्निचितमनुचितैर्जन्तुभिः कालगत्याविस्रं प्रस्नावि जीर्णं क्षणमपि रुचिरं मार्जनाद्यैर्विना न ।देहं गेहं च तुल्यं परमिह निघने गेहमन्योपयुक्तंस्यान्नो देहं; सतीत्थं न तदुपकृतये जीवतो यस्य तं धिक् ॥ ३९ ॥

40

मूकत्वान्नग्नभाषान्मललुलिततनोरुक्तयोगाच्च दुःखाद्बाल्यं पैशाच्यमुच्चैः कथमपि शनकैर्यावदेतद्व्यपेतम् ।बिभ्रद्दोषप्रकोपं करचरणमपीतस्ततो भ्रान्तनेत्र-स्वान्तं निक्षेपयन् हा सपदि तरुणिमोरुज्वरोऽलम्भि तावत् ॥ ४० ॥

41

तारुण्यारण्ययातोऽप्यहह किमु न रे सावधानोऽसि जन्मिन्हन्युस्त्वां व्यग्रमुग्राः प्रचलितमभितो व्यापकाः पञ्च चैकम् ।कोपो द्वीपी प्रपञ्चोऽहिरपि मद इभो मत्सरः सूकरेशोदम्भो भल्लूक एषोऽसमशरशरणो मन्मथश्चोरनाथः ॥ ४१ ॥

42

यातायातं विधत्ते सुखमसुशफरी कायकासारदेशेयावत्संफुल्लचक्षुर्मुरवकरचरणाम्भोजराजीविराजि ।स्फूर्जद्वानीरपूरे बहिरमलतरे तावदत्तुं स्थितस्तांकुर्वन् मन्दं पदं स्वं बत पलितबको वञ्चकः कुञ्चिताङ्गः ॥ ४२ ॥

43

संशीर्णा हन्त दन्ता नवयुवतिरदाच्छादनच्छेददक्षा-श्चक्षुर्नोद्वीक्षणेऽपि क्षण(म)महह रहः स्त्रीकटाक्षानुभावि ।कर्णौ बाधिर्यपूर्णौ बत निपुणवधूचाटु संश्रुत्य फुल्लौनिर्लज्जो जन्तुरेवं सति वहति रतिं योषिति त्यक्तरत्याम् ॥ ४३ ॥

44

अक्ष्णोरश्रुप्लुतत्वं स्वरविकृतिरतिस्तब्धभावश्च गत्यावैवर्ण्यं गात्रकम्पः प्रलय इति दशा यद्वशेनाभिगम्याः ।प्राप्तावज्ञां जरास्त्रीं समधिकवलितां मौलिना तां भजन्तंकान्ता स्वं वीक्ष्य नाथं प्रथममनुरताऽप्यन्तिकं नोपयाति ॥ ४४ ॥

45

पादौ संस्तम्भयन्ती मुखमपि नमयत्यङ्गमाकुञ्चयन्तीहस्तावुत्कम्पयन्ती प्रणयिजनवचो न श्रुती श्रावयन्ती ।रत्यामुद्वेजयन्ती वलिततनुमतो नूतनोढा जरा वातुल्या पूर्वा तु पुंसस्त्रसति बत परा भीतिहेतुर्नरस्य ॥ ४५ ॥

46

बालं कृष्णं प्रसूनार्चितमनवरतं यः पुरासाद्य मूर्धार्युक्तः पङ्क्त्या द्विजानां शुचितरवपुषाभीप्सितान्नान्यभुङ्क्त ।सोऽयं तन्नो दृशाप्याकलयति बिभृते चापि नैकं द्विजं हावृद्धत्वे किंतु जन्तु: स्वजठरपिठरं कष्टरूपं बिभर्ति ॥ ४६ ॥

47

वालैरात्तं सितत्वं निजमिति गलिता लज्जयेव द्विजालिःतस्या दृष्टैव दैन्यं नयनयुगमगादन्धतां खिन्नमन्तः ।वार्ता श्रुत्वेति दुःखांकुलमिव बधिरं कर्णयुग्मं च जातंज्ञात्वापि स्वाप्तङ्क्तेर्विपदमिति कथं जीवितं स्थातुमीष्टे ॥ ४७ ॥

48

आसीत् पूर्वे सुहृत्ताद्यलस उपचितोऽप्यज्ञ सत्सु द्विजेषुक्षीणत्वे तु द्विजेषु व्यसनिषु पतितेष्वद्य प(य)द्यादरस्ते ।किं स्यादस्यां दशायां तव हितमुचितं किंचिदाख्यामि संख्यात्मन्त्रं सप्ताक्षरं त्वं जप सुगमममुं-'पाहि भो मामुमाप' ॥ ४८ ॥

49

केशा: शेषाहिवर्णा वदनमपि वलीधारि दन्ताः समन्तात्जाता: पातादवृश्या वचनमवशगं हन्त दोषाः सपोषाः ।श्रोत्रं गोत्रं शृणोति स्वमपि न नयनं क्लिन्नमङ्गं सभङ्गंस्वान्तं भ्रान्तं मुहुस्ते स्मरसि न किमु रे मारहन्तुः परं तु ॥ ४९ ॥

50

आयुर्दायं प्रभावाद्विपुलमथ मितं जन्तुजाताय दद्युःघुस्थानस्था ग्रहा ये विविधगतियुता जीवमुख्यास्तथापि ।वृद्धत्वं प्राप्य तेऽस्तं कतिपयदिवसैरेव यान्तीति बुद्ध्वावृद्धा भूस्था(त्वा)पि जीवाः स्वहितमहह नो कुर्वते ते(ऽन्तेऽ)न्तिकस्थे ॥ ५० ॥

51

दोषोपद्रुत्यनूनं भवगदमशितुं यस्य केऽप्युद्यता नोवृद्धस्यापथ्यवृत्तेः किमपि न धनिनस्तेन काशीष्ववाप्य । विश्वेशादेर्गणस्याङ्घ्रिदशकयुगलं स्वौषधं सिद्धबुद्धंसन्मात्रं त्रासहीनं प्रतिदिनमरुणार्काङ्घ्रियोगेन सेव्यम् ॥ ५१ ॥

52

सत्सङ्गः सर्वकालं सललितवचनं सादरत्वं स्वधर्मेसंकष्टे खन्तदाढर्यं सुतयुवतिसुखे स्तोकसंसक्तभावः ।संतोष: स्वल्पलाभात्सकलजनहिताशंसिता स्वामिसेवासामर्थ्ये सौम्यवृत्तिः सदयहृदयता संसृतेः सादहेतुः ॥ ५२ ॥

53

भीतामेतां कृतान्तादवसि (न) जनतामानतां सर्ववेत्तां (त्ता)त्वं चेत्तन्मुञ्च मुञ्च त्रिजगति गदितं नामजातं स्वकीयम् ।भूतेशो विश्वनाथस्त्रिपुरहरशरः श्रीमहादेव ईशःस्थाणुर्मृत्योर्विजेता गरभुगथ शिवः शङ्करः शम्भुरेतत् ॥ ५३ ॥

54

सोमः कामोऽभिलाषो मम च समतमाश्रित्त(ज)त्वाद्रतेर्वायोग्यत्वात्त्वद्गतत्वाद्बहुतरसुमनःसंमतत्वात्सतोत्थं (समोऽहम्?) ।सख्यं द्वेषोऽप्युपेक्षा यदिह भवतु तत्ते महेश प्रभुत्वात्दृग्वैषम्यादपि त्रीक्षणमपि तु न किं शङ्करः शं करोषि ॥ ५४ ॥

55

म्लानेनेत(न)स्य गेहे स्थितमधिकवसोः पर्वकाले मयोच्चै-रभ्यस्तं भ्राम्यता च प्रसरणमहह प्रत्यनन्तं करस्य ।दत्तांशेनाऽमराणां भजनमधिकृतं नामतः कर्मतश्चप्राप्तं सोमत्वमित्थं तदपि मदुदयो देव राजाशया न ॥ ५५ ॥

56

गौरीयुक्ताङ्कभागां वलयितभुजगां भूरिभस्माङ्गरागांमौलिव्यालीनगङ्गां श्रिततुहिननगां क्लृप्तकन्दर्पभङ्गाम् ।मुण्डोरुस्रग्धरां तां मुनियतिनिरतां वेदबृन्दानुगीतांनौमि ब्रह्माद्या(द्वयां?) तां गगननिवसितां शंभुमूर्तिं प्रशान्ताम् ॥ ५६ ॥

57

द्वारे द्वारे परेषां प्रगटगुणगलो भ्रामितो नामितास्थोवेषाद्यैर्हास्यदोऽहं प्लवग इव युवा दण्डवत्या युवत्या ।तत्त्वास्तामस्तशक्तिं सजरसमरसं मां तथा नर्तयन्तीतृष्णे कृष्णानने किं न कलयसि कृपां किंचिदद्याप्यवद्ये ॥ ५७ ॥

58

नानादानानि मानाग्रसरमकरवं हेतुहीनानि नाहंदीनानां चाशनायामशमयमुचितेनान्नपानादिना न ।आसन्नानां जनानामभिमतमपि नापूरयं निर्धनाना-मन्नान्येवांघमानामघसमणुमन हा धनाढ्योऽप्यनर्थः ॥ ५८ ॥

59

श्यामा दृश्यापि रामा यदपि तदपि सा हन्त लाभातिवामायामालोक्याभिरामाननुसरति नरो नैव धामादिकामान् ।क्षामात्मा हीनघामा क्षणमपि विकलो न त्रियामासु शेतेमा मा याहीति गामालपति च वितथं तेन तामाश्रयेन्न ॥ ५९ ॥

60

आराकाराणुवेणी शिरसि, कृशतरा मध्यमुष्टौ, परत्रस्फाराभ्यन्तःकठोरा बहिरपि मलिना वस्त्रकोशे विलीना ।वाग्धारायां सिता या दृशि परिपतिता मोहकारी नराणांस्मारी नारी कृपाणी यदि लगति गले जीवहारी परं सा ॥ ६० ॥

61

बाला: शीलप्रलोला विहितमदमला हन्त हालाविलासा:कालाद्धातानुकूला: कथमपि कमला: स्वादुहालाहलाभाः ।खालापा नालमाता(?) प्रण(णि)हतकुशलाः व्याधजालालिलीलाव्यालान्यद्वच्छृगाला(:) किमु भजथ बलात्तत्किलामू: कुशीलाः ॥ ६१ ॥

62

सौधा: संपत्त्यगाधाः किल मम बहुधाऽह्लादभाजोऽवरोधाःयोधाः क्लृप्तारिरोधाः पृथुरपि वसुधा वाहिनी दुर्निबोधा ।भो धात्रीशेत्यसाधारणमदमबुधाधीश चित्तेऽत्र मा धाःवेधाः स्वप्नाभमाधात्त्वयि तदिति मुधा किं विधत्सेऽपराधान् ॥ ६२ ॥

63

कामान्क्षेमाशयेमान्परिणतिविषमान् हा समाधाय चित्तेक्षामाचारा भ्रमामोऽनुदिवसमधमा नीचधामाजिरेषु ।किंतूमाधार चर्माम्बर हर पुरजिन्मारमारेति शंभो-र्नामालीमालपन्तः क्षणमपि सशमास्तं नमामो न नान्यम् ॥ ६३ ॥

64

सारासाराविचाराद् वयमहितपरा हन्त दारान्भजामःकारागाराणि मारावनिपवशतरास्तज्जजीवानुरागा: ।आरादाराघनीयं न तु मदनरिपुं जन्ममाराम्बुधारा-पारावारावतारानुगुणमनुचराराममाराधयामः ॥ ६४ ॥

65

अङ्गासङ्गादनङ्गाल्पविषयसुखदात्कामिनीनां प्रसङ्गात्पञ्चाभ्यङ्गांस्तरङ्गानिव पलसमयेनाकलय्याशुस(भ?)ङ्गान् ।गङ्गाभङ्गात्तरङ्गामभयवरकुठारान्तिकोद्यत्कुरङ्गा-मङ्गाव्यङ्गामनङ्गारितनुमनुदिनं चिन्तयाञ्चद्भुजङ्गाम् ॥ ६५ ॥

66

पाखण्डाचारिदण्डार्हण उपसरता दानशौण्डान्वितण्डा-वादैरिद्धेन रण्डार्जव(न?)पटुवचसा हा मयाऽनाय्यनेहा ।ध्याता न विन्दुखण्डाकलितसदलिका मूर्तिरानद्धमुण्डागण्डालोलाहितुण्डा निजभजनकृते दत्तपण्डा प्रचण्डा ॥ ६६ ॥

67

सारङ्गाक्षीं सहारं रहसि न कलये चारुताराङ्गवर्णोनोदारं सानुकारं ललितमपि भजे गानमिष्टाङ्गहारम् ।संसारं निर्विचारं प्रशमयितुमहं दुःखभारं ह्यपारंवारंवारं तु सारं जटिलमतिसितं दग्धमारं स्मरामि ॥ ६७ ॥

68

नाशापाशातु पाशावदपि....(?)कृशा यद्धृशाकृष्यमाणायातायातानि जाताभ्यधिकविकलताः कुर्वते तावदेते । मायानायादपायादवितजनचया तद्व्ययार्थं मयाऽसौतारा ताराद्यताराधिपशकलधरा मूर्तिराराधनीया ॥ ६८ ॥

69

योषासङ्गाः प्रदोषा इव कृतमनस: प्रीतिपोषाय नामीकोषाश्चोरोत्थमोषाञ्चिरतरमवतो मे वतृष्णापहन्त(?) । कामस्येर्षाहरोषामनुसरणकृत: क्लृप्तमायाधिशोषा-मीडे तोषाय दोषाकरलसदलिकां व्यक्तिमेकामदोषाम् ।। ६९ ।।

70

पुत्रा मे सच्चरित्राधिकविहितमुद्रः प्रेमपात्राणि मित्रा-ण्यापन्नत्रासगोत्रा यदपि युवतयः पद्मनेत्रार्थचित्रा: ।कोऽपि त्राता बतात्रास्ति न यमभयतो नन्दिपत्रा पवित्रामूर्ति: पित्रा च मात्रा सहगिह तु जयत्यन्तकत्रासिगोत्रा ॥ ७० ॥

71

संपत्ति: कम्पयन्ती तरलमतिचला शम्पया तुल्यरूपासंपर्क लम्पटोऽस्या इति सति कुरुषे त्वं परं स्वाहिताय । अङ्कप्राप्तेष्ववङ्कस्थितिमधिकदयं दत्तसङ्कल्पितार्थपध्वान्तांशुमन्तं किमिति न भजसे रङ्क रे शङ्करं तम् ॥ ७१ ॥

72

कारावन्ना कुदारानयमशुचितरानर्पितोद्वेगभारा-नर्थाक्षेपानसारानवनपरनरान्नेत्य(नेत्य?)दैवात्सुसारान् ।आहारान्वा विहारान्परिहरतु वरान् स्वान्ततो यावदारात्मुक्त्यै तु स्मारहारान् जपतु सुखकरान् नाममन्त्रानुदारान् ॥ ७२ ॥

73

अर्वाणः सन्त्यपूर्वा मम बत करिणः शैलतर्वाद्यखर्वागीर्वाणांश्चानुपर्वासुखयमहमहो श्रीपतिर्वासनाभि: ।भगार्वान्मुञ्चेति सर्वानखिलमपि चलं स्वर्णमर्वाग्यतोऽर्वाक्शर्वाणीकान्तमुर्वाश्रयमभयधिया मित्र ! कुर्वात्तिभावः ॥ ७३ ॥

74

किं गर्वी जन्तुरुर्वीस्थपतिरहमिति स्वानुपूर्वीप्रवृत्त्यास्वर्वीथ्यन्तं तु सर्वे परिणतिविरसं चेत्तदुर्वीशतेष्टा ।अङ्गीकुर्वीत दर्वीकरकरवलयं तर्ह्यखर्वीकृतार्थिस्वान्तान्तर्वीतरागैः सततमधिगतं धाम चार्वीशनाम ॥ ७४ ॥

75

आशाशाली न्यपाली(?) विचरसि परितः किं नृपालीरपाली-र्भालीया वर्णपाली फलति यदुचितं मन्द नालीकतात्र ।आलीनो गोमचाली(?) विमलहृदयखे चित्प्रभालीढमूर्तिःकालीशाली कपाली भवतिमिरहतावंशुमाली विधेयः ॥ ७५ ॥

76

संसारेऽस्मिन्नसारे घनविपिनसमे पन्नगीभूतदारेगर्ताकारोवगारे किमु रजथ वृकप्रायमारे जड़ा रे ।दीनान्पान्तं सुशान्तं शिशिरहिमरुचाऽतीव भान्तं न भान्तंगौरीकान्तं तु कान्तं प्रभजत भजतां वारितान्तंनितान्तम् ॥ ७६ ॥

77

अन्योन्यारब्धवादैरभिलषितधना मान्यमप्यूनयन्तोधन्यंमन्या यदान्यान्वशयितुमनसोऽनेहसं हा नयामः ।
वन्यान्नेनाशनायामवनिधरझरेणाप्युदन्यां हरन्तोधन्यास्तेऽनन्यभावा मह उचितहिमान्यद्रिकन्यं मनन्ति ॥ ७७ ॥

78

पीयूषाभं सुशान्तं तुहिनकरकरासङ्गतः शीतलाङ्गंरिङ्गद्गङ्गातरङ्गं हिमगिरितनयालिङ्गितं शङ्करं तम् ।सन्तः सञ्चिन्तयन्ते भजनरसमयं शैत्यमन्तर्वहन्तोमोदस्वेदार्द्रदेहाः सपदि भवदवव्याप(प)तापोपशान्त्यै ॥ ७८ ॥

79

हास: कामानुसारी गतरसमशनं हास्यसन्दायि वासोरासोऽप्यात्मावसायी वसतिरशरणा यस्य दासः खपाणि: ।
आयासोऽन्यानुपोषी वच उचितरसं दुःखनाशोऽनुशासोविश्वासः शास्त्रवासी मम भवतु सता तेन साकं निवासः ॥ ७९ ॥

80

दूनानानन्दयन्तो मृदुपदवचनैः सान्द्रमानैश्च दानैःविन्दन्तो मोदमिद्धं परगुणकथने नान्यनिन्दां वदन्तः ।भिन्दन्तो नावधिं स्वं न च मदपदतामुद्वहन्तो धनाद्यैःकीर्येन्दुं मन्दयन्तो दममतिदधतः सन्तु सन्तो हृदन्तः ॥ ८० ॥

81

सन्तो भालेन्दुनामावलिलपनभवाह्लादकल्लोललीनाःसोल्लासं शीलपाला बलिकलिकलुषक्षालिनो लीलयैव ।उल्लोलैरप्रचाल्याः सुललिततलनालापबालप्रलापैःसंपल्लाभेऽप्यलोभाः सकलविकलतोन्मूलिन: शीलनीयाः ॥ ८१ ॥

82

बोधाधारोऽनधीनो विषयपरिषदः प्रान्तबाधाविधात्र्या:दीनोद्धारानुबन्धी गुरुविबुधमुदे संविधासंविधायी ।
अक्रोधोऽन्यापराधश्रुतिविधिविधुरा धीरधीराधिरोधीसंघासार्थ(?)व्युपाधिर्मधुमधुरवचाः साधुराराधनीयः ॥ ८२ ॥

83

कायस्थैर्याय चर्यामृतुषु समुचितां हन्त कुर्वन्त्यनार्या :कस्मै कार्याय गिर्यादिवदविचलता देहिनां हा कदर्या ।तार्यस्तर्या ययाऽसावुरुभवजलधिर्भावव(च)र्यानिलात्ये(धै)-रार्याभार्यात्मकस्य प्रविदधति गुरोस्तां तदार्याः सपर्याम् ॥ ८३ ॥

84

वामा: कामादयोऽमी हृदयबिलगता दूरतो यान्ति भीमामर्माण्याबाधमानाः पृथुमहिमगुरोर्नाममन्त्रोक्तिमात्रात् ।
आदायायव्ययायाभिरतिमुरुभयामत्मनेऽपायदायीभूयोभूयो जडाये किमु न भजसि तं निर्भयायाश्रयाय ॥ ८४ ॥

85

सेवामेवानु देवा ददति बत न वा साधु वा साध्वभीष्टंनैते दावाग्निवाम्यं भवमुपशमयन्त्यत्र सौवानुभावात् ।कर्णे वाक्यप्रवाची स तु जयति गुरुः सर्वदेवाभिधान्वा (वान् ?)दैवावाप्तः सुनिर्वापयति भवदवं यो दयावा:प्रवाहैः ॥ ८५ ॥

86

हेतेभीतेर्भवो मे बत गहनतया दाव एवेति मन्येकर्मेधैस्त्रिप्रभेदैर्यदयमनुगतोऽनूनजीर्णातिजीर्णैः ।
नानाकारैरसारैर्विषयतृणचयैश्चान्वितो यत्तदेनंशंभो भो मारदाहिन् पुरमथन गुरो त्वं दहेरग्निमूर्तिः ॥ ८६ ॥

87

भ्राम्यन् दीनं रुवन् नृभ्रमर भववने लेक्षि किं भिक्षयाल्पंपक्षादक्षो रसं दुर्विषयकुसुमजं कालसंज्ञानिलार्त: ।गत्वा त्वानन्दवत्यां(न्यां) पिब शिवमुकुटाम्भोजजातं प्रभूतंगङ्गाम्भोमध्वरुद्धभ्रमणकृतततक्लन्तिशान्त्येकहेतुम् ॥ ८७ ॥

88

योगाद्धोगाच्च जातां क्षणमपि सुखितां यो न यातोऽर्थतातोमाता भ्राताप्ययासीद्यदुरुधनगुणैर्नैव पोषं च तोषम् ।
सारासारार्थचिन्ताशिथिलितममताकण्ठनाहं तदाहंमा(या)यां मायान्तकारित्रिपुरहरपुरीं सत्पुरीणां धुरीणाम् ॥ ८८ ॥

89

यातस्तातस्त्वकृत्वा मम हितमहितास्तावदेते समस्ताःकामास्तान् कस्त्वदन्योऽस्तमधिगमयितुं वस्तुतः शक्त आस्ते ।दृङ्न्यस्त्या कामशास्तस्त्वमनुपमदय स्तुत्य पूतप्रशस्तेसच्छास्त्रोपास्तिवस्तूपदिश किमपि मन्मस्तकन्यस्तहस्तः ॥ ८९ ॥

90

अस्यामानंवदान्या (नन्दवन्या)मतुलफलभरैः सद्द्विजालीपरीतैःरम्यायां हर्म्यवृक्षैर्मृदुलसुरनदीस्नातवातानुयातैः ।खेदच्छेदः कदा स्यात्प्रभ भव भवतोन्नामितावामकर्णीलम्बस्वापावलम्बात् सततभवपथभ्रान्तितः श्रान्तिभाजः ॥ ९० ॥

91

शंभो किं मां विभो हा तयितुमिह न भो भावमालम्बसे त्वंनो याचे भोगिभोगोपमितिसहमहं भोगमत्रेष्टभोगः ।नो वा रम्भोरुकुम्भोपमकुचभजनं योगिदम्भोलिपाणेकिं त्वम्भो मुक्तदम्भोऽर्थय उपरतये भो नभोनिम्नगायाः ॥ ९१ ॥

92

या गङ्गाऽपास्य गङ्गाधरमुकुटमगाद्गां तदाज्ञाप्रसङ्गात्कर्तुं जीवाननङ्गान् रतिगतइयतान्( ? ) दुःखभङ्गानुषङ्गात् ।
अङ्गाभूदै(है)वभङ्गात्यजथ बत वनीवायुसङ्गाद्विहङ्गा (?)यद्वत्किं भक्तिगङ्गा कथमपि सहते बहनङ्गान् रतिर्नः ॥ ९२ ॥

93

रङ्कश्चेद्यान्ति शङ्कामिह बहुमृतितस्तैरलं काय एषोऽ-लङ्कार्यो गाङ्गपङ्कादिभिरमृतपुरे भीतिरेवं ध्रुवं का ।
आतङ्कानर्हि(ई)मङ्काधिगतगिरिसुतं यातु तं कालजेतुःभाव कालात्कलङ्काविषयमपि नतं बाणलङ्काधिपाद्यैः ॥ ९३ ॥

94

भुञ्जन्दायं स कायं भृतजरमवयन् भाव्यपायं बतायंतत्रोपायं स्थिरायं सपदि वितनुतामेतमायंस्तु काशीम् ।रायं दत्वान्तरायं गिरिशगुणगणं साधु गायन्नमायंपायंपायं द्युनद्याः सलिलमनुसरेतं सदम्बासहायम् ॥ ९४ ॥

95

भूरीभूतार्तिधारी क्षितिभृदनुचरीभावतः पुत्रनारी-पोषायोद्योगकारी गहनगिरिदरीवार्धिवारिप्रचारी ।दूरीकर्तुं शरीरी भ्रमममिमुरीकर्तुमन्ते स्मरारी-भावं चार्यानुसारी पिबतु शिवपुरीसिन्धुवारीण्यवैरी ॥ ९५ ॥

96

यातायातानि कामं महति भववने कर्मशक्तैः क्रियन्तांकान्तासन्तानवित्तादितरुफलरसं पातुमापातरम्यम् ।
किंतूमाकान्तकल्पद्रुममुकुटफलश्च्योतदानन्दवन्यांस्थाता पातास्मि दत्तामृतममृतमहं क्लान्तिशान्त्यै नितान्तम् ॥ ९६ ॥

97

शस्तायस्तात्मचिन्ताविरहितमनसस्तामतस्तापजाता-ज्जन्तोस्तावन्निरस्तापरणुमजनतस्तारणः स्तावकानाम् ।मृत्योः शास्ता समस्तार्थिजनसुरतरूस्तारभा:(क्) तारकारे:स्तावन्ते (वान्ते)मे पुरस्ताच्छिवपुरि वसतस्तारकाख्यातये स्तात् ॥ ९७ ॥

98

लोभात्त्वां वासयित्वा स्ववदनसदने गीर्मयापा(या)सितासित्वं नित्यं चित्तबन्धोचितविविधगुणान् गुम्फयित्वा भवत्या ।नृभ्यो विक्रेतुमिष्टान् कदुदरभृतये प्लान(?) तन्मे शयानाजिह्वामञ्चे विमुञ्च श्रममसममुमाखामिनामोपधाना ॥ ९८ ॥

99

गौरीकान्तार्थिपालिन् भव गर(ल)गरलिन् भर्ग हेरम्बबालिन्शंभो भालाग्निशालिन् मृड मृतिकबलिन् कृत्तिवासः कपालिन् ।शूलिन् घोसिन्धुधारिन् गिरिश हतकरिन् उग्र सर्गापहारिन्भीम प्रेतानुसारिन् शिव वसतिहरिन् मारजिद्भूतिभारिन् ॥ ९९ ॥

100

शर्व प्रोद्यत्कुमार प्रहतमख हर व्योमकेशाहिहारस्थाणो वेदान्तसार त्रिपुरजिंदपर श्रीकपर्दिन्नपार ।आत्मारामाविकारेश्वर जननहरेशान्त(त्त)लीलावतारे-शाण(न) प्रौढाङ्गहारेडित दयितगिरेऽर्धाङ्गदारान्धकारे ॥ १०० ॥

101

विश्वादे विष्णुबाण त्रिगुण गतगुण श्रीदमित्र प्रमाण-व्यापिन् नन्दिप्रयाण क्षितिरथ शरण त्र्यक्ष गायत्पुराण ।मल्लारेऽन्यानधीन द्रुहिणकहृतिकृत्स्थूलविश्वात्मलीनश्रीकण्ठाद्यन्तहीन प्रणवसुवदन प्रेष्ठ दीनप्रेरक ॥ १०१ ॥

102

सर्वज्ञ ख्यातदानोच्चपद मृदुमनो भैरवाध्यस्तसानोभाखन्हस्तत्तजानो भव धवलतनो शङ्कराक्षीन्दुभानो ।ज्ञानाब्धे हृद्यगीते वरद गणपते विश्वनाथास्तभीतेभूतेशालोकरीते मुनिमत सुगते रुद्र नागोपवीते ॥ १०२ ॥

103

नीलारक्ताग्निरेतोऽजगवभृदजितोदारलीलोक्षकेतोगुर्वात्मन् धर्मसेतो पशुप चितिरतोपात्तसोमात्महेतो ।एवं संबोधनीयाष्टसहितशतया नामपङ्क्तचाच्छकायादुर्वारस्फारमायाश्रमहरणधिया व्यक्तिरेषाऽनपाया ॥ १०३ ॥

104

गोपोदारप्रचारे ललिततरतनौ प्राप्तभामे कदाचित्भिन्दाने नागदेहं विषमविषसखे भूतिपात्रेऽतिमात्रम् ।अब्जेन भ्राजमाने सततधृतशिवे चित्तजन्मान्तहेतौचेतः सर्वे विमुच्यानुरज समतया त्वं मुरारौ पुरौवा (पुरारौ ) ॥१०४ ॥

105

क्षीराब्ध्यम्भोविहारप्रिय निगमचर प्रस्फुरच्छङ्खमारश्रीकूर्मागाधसार स्थिरघरणिधर स्वाश्रयाकृत्युदार ।पोत्रिन् दंष्ट्राकरालोद्धृतधर सबलोद्वेलसिन्धो दयालोपुंसिंह प्रेष्ठबालोत्कटसट घवलोद्भिन्नदैत्याशयालो ॥ १०५ ॥

106

बल्यर्थिन् छद्मभारिन् द्विज पदजसरिन्नाकिपोच्चत्वधारिन्वीर क्षत्रान्तकारिन् भृगुसुत समरिन् मातृभेदिन् कुठारिन् । सीतेशाभ्राभिराम श्रितवन सशमन्नाततात(त्रात आत्ता ?)र्थिकामच्छन्नाब्धे वालिवान(?)श्रितभृतहनुमन् ग्रस्तलङ्केश राम ॥ १०६ ॥

107

आपाण्डो कामपाल प्रधृतहल बल श्यामवासो विशालश्रीबुद्ध श्रुत्यपाल प्रदय दशबल म्लेच्छभित् कल्किता(का?)ल । कृष्णाभीरच्छचेतः सुरभिप ललित श्याम गोपीसमेतव्यालारे कंसजेतर्नर मदनपितर्वासुदेव प्रणेतः ॥ १०७ ॥

108

पद्मिन् राजत्कृपाणेतगद धृतमणे कम्बुभृच्चक्रपाणेसूर्यात्मन् देव बाणेज्यतम इभशृणे श्रीपते शार्ङ्गपाणे ।विष्णो पक्षीन्द्रकेतोऽच्युत गजप हितोदात्त लोकेश हेतोपीतक्षौमानिकेतोदरजगदभि(मि?)तोदस्तभीर्लोकसेतो ॥ १०८ ॥

109

वैकुण्ठाम्भोधिशायिन् विधिप मधुजयिन् पुण्डरीकाक्ष मायिन्चिन्मूर्ते वित्तदायिन्नविषम विषयिन् यज्ञभूः सोमपायिन् ।भूयः शान्त्यै विशोकाष्टसहितशतकाख्याभिरालीनलोकासंबोध्यैवं हृदोका विदलितकलिका मूर्तिरध्यस्तगोका ॥ १०९ ॥

110

ज्ञातुर्दातुर्दयालोः सकलकलकुलालंकृतेर्मुद्गलाद् यःप्राभूज्झापाम्बिकायां सुललितयमलग्रामधामा स सोमः ।वैराग्यं प्राप्तुकामः स्वमृदुमतिलताजातया जाड्यचुञ्चुःपञ्चाशत्पद्यपुष्पा (ष्प्या) द्विरकृत गिरिजाजानिपादाब्जपूजाम् ॥ ११० ॥

111

मेनामादी मुरारे रणकृदमितताां सङ्गतो युक्तरामोभीरेप्रीतीभ(?)मेयामितिविभवकरोऽतीव सौख्यं प्रपन्नः ।भीमोरुर्मारमारो बहुमुख(ध)रताविश्रुतो दामिताहिःशंभुर्भाग्याय भूयाद् हरिरिव भजतामत्र सोमस्य पद्ये ॥ १११ ॥